INTERNATIONAL CONFERENCE ON RESEARCHES IN ENGINEERING, SCIENCE, MANAGEMENT AND HUMANITIES (ICRESMH – 2025)

Delhi, India on 27th April, 2025

CERTIFICATE NO : ICRESMH /2025/C0425481

# अग्निपुराणे वर्णिताः समासनियमाः : पाणिनीयदृष्ट्या परीक्षणम्

**Arpita Banik**

Research Scholar, Department of Sanskrit, Mansarovar Global University, Sehore, M.P., India.

**सूचीमुखशब्दाः - संक्षिप्तसारः, अवतरणिका, संस्कृतव्याकरणसाहित्ये समासाः, अग्निपुराणे वर्णिताः समासाः पाणिनीयदृष्ट्या तत्परीक्षणञ्च, उपसंहारः, शब्दसंक्षेपः, ग्रन्थविवरणपञ्जी**

**संक्षिप्तसारः** - विश्वस्य प्राचीनातमा हृद्या, निरवद्या, सकलैरपेक्षितैः संस्कारैस्सम्पन्ना, साहित्य-काव्य-कोश-व्याकरणादि सर्वाङ्गैस्समन्विता अनादिकालतः काले काले परमात्मनावतीर्य संरक्षिता महोभिगौरवमण्डितास्ति संस्कृतभाषा । भाषायामस्यामेव एकशतमध्वर्युशाखा, सहस्रवर्त्मा सामवेदः, एकविंशतिधा बाह्वृच्यम्, नवधाऽथर्वाणो वेद इति महाभाष्योक्ताभिः1131 शाखाभिः समन्विताः ऋग्यजुः सामाथर्वाणो वेदाः शिक्षाकल्पनिरुक्तछन्दोज्योतिर्व्याकरणाख्यैः षड्भिः वेदाङ्गैस्समेधिता विराजन्तेतराम् । एतेषां प्रतिवेदानां अर्थावगमनाय षड्वेदाङ्गानि तथा षडङ्गानि सन्ति । तेषु षडङ्गेषु व्याकरणमेव वेदपुरुषस्य मुखरूपेण कल्प्यते । तदुच्यते **... *मुखं व्याकरणं स्मृतम्*** इति । स्कन्धमते ***व्याकरणं सारं सिद्धस्वरूपकम्*** इति । कात्यायनविबोधाय बालानां बोधाय च स्कन्धमहोदयः व्याकरणशास्त्रस्य सारं कथयितुमचिकीर्षत् । इह खल्वस्मिन् व्याकरणशास्त्रे प्रत्याहार-सन्धि-शब्दरूप-अव्य-कारक-समास-तिङ्-कृत्-इत्यादयः विविधविषयाः सुपरिवेशिताः सन्ति ।

साम्प्रतं व्याकरणसमन्वितस्य वेदाङ्गस्य प्रतिनिधिभूतमेकमेव व्याकरणमस्ति पाणिनीयं व्याकरणम् । महर्षिणा पाणिनिना अनुमानतः सहस्रचतुष्टयैः स्वल्पाक्षरसूत्रैः संस्कृतभाषायां नितान्तं वैज्ञानिकं व्याकरणं प्रस्तुतीकृत्य विदुषः आश्चर्ये निपातिताः । वैज्ञानिकदृष्ट्या देवभाषाया यथा मनोहरं शास्त्रीयं विवेचनं महर्षि-पाणिनिना कृतं तादृशं विवेचनमन्यत्र नोपलब्धमस्ति । यथा व्याकरणसाहित्ये *अष्टाध्यायी*, तथा अष्टादशमहापुराणेषु *अग्निपुराणं* तु एक एवान्यतमं महापुराणम् । तत्र विविधेषु वर्णितेषु विषयेषु व्याकरणशास्त्रं त्वेकमेव । व्याकरणशास्त्रेषु तत्र प्रत्याहार-लिङ्गत्रय-सन्धि-सुप्-तिङ्-कारक-समास-तद्धित-कृत्-उणादीनां विवरणमस्ति ।

इदानीम् आधार एव आधेयस्य आश्रयस्वरूपः । यदि आधार एव भिन्न स्यात्तर्हि आधेयोऽपि भिन्नो भवति इति साधारणो नियमः । आधारवैचित्र्ये सति आधेयवैचित्र्यं प्रतिफलितमिति निश्चितरूपेण वक्तुं युज्यते । प्रतिग्रन्थेषु विषयवर्णनं स्वाभाविकतया स्वकीयरीत्या स्वकीयपरम्परया च विहिता । विषयवर्णने तत्रातीव वैचित्र्यमस्तीति स्वाभाविक एव । व्याकरणगतेषु विविधेषु विषयेषु समासमवलम्ब्य अष्टाध्यायी-अग्निपुराणयोः तुलनात्मकसमीक्षा एव गवेषणापत्रस्यास्य मुख्योद्देश इति ॥